Shree Somnath Sanskrit University Grantha Series - 10

# VĀKYĀRTHAJYOTIḤ

Issue - 2 Year - 2015-16

Chief Editor
**Pro. Ark Nath Chaudhary**
Vice-Chancellor
Shree Somnath Sanskrit University, Veraval

Editors
**Dr. Pankajkumar Rawal**
**Dr. Satrughna Panigrahi**

Shree Somnath Sanskrit University - Veraval - Gujarat

प्रकाशकः -

प्रो. महेन्द्रकुमारः दवे
का.कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी
राजेन्द्रभुवनरोड, वेरावलम् - ३६२ २६६
गीर-सोमनाथजनपदम्, गुजरातम्
दूरभाष : ०२८७६-२४४५३२, फेक्सः २४४४१७
www.sssu.ac.in

सहसम्पादकः समन्वयकश्च -

डॉ. कार्तिकपण्ड्या
संशोधनाधिकारी
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

© *Shree Somnath Sanskrit University, Veraval - 2018*

प्रथमं संस्करणम् - मई - २०१८

प्रतयः - ३५०

ISBN - 978-93-83097-27-2

मूल्यम् - रु. २०० /-

मुद्रकः - जलाराम ग्राफिक्स एन्ड ओफसेट
परमहंस अेपार्टमेन्ट के पास,
होटल कावेरी के पीछे, एस.टी.रोड, वेरावल-३६२ २६६
जि. गीर सोमनाथ, गुजरात (भारत)
दूरभाष : (०२८७६) २२१८६१

# ज्यौतिषशास्त्रे नवविधकालमानविचार:

डॉ. रमेशचन्द्र: बी. शुक्ल:
श्रीसोमनाथसंस्कृतयुनिवर्सिटी सञ्चालित संस्कृत कोलेज,
वेरावलम्,गीरसोमनाथ: गुजरातराज्यम्

ब्रह्माण्डे अस्मिन् कालो द्विधा भवति, एकस्तु लोकानां सकलभुवनभूतानाम् अन्तकृत् = संहारक:, अनन्तोऽखण्डश्च कालो भवति यथा उक्तम् –

काल: पचति भूतानि सर्वाण्येव महात्मना ।
कान्ते स पक्वस्तेनैव सहाव्यक्ते लयं व्रजेत् ॥[१] इति ॥

अन्य: द्वितीय: काल:, कलनात्मक: = गणनात्मको लोकैर्ज्ञातुं योग्य: (खण्डकाल:) भवति । स अन्य: (कलनात्मक:) कालोऽपि स्थूल: सूक्ष्मत्वात् = महत्त्वणुत्वभेदात् मूर्तोऽमूर्तश्चेति, द्विप्रकारकोच्यते । स्थूल: काल:, मूर्त:, व्यवहारे योग्य: ग्रहणार्ह: । सूक्ष्मकाल अमूर्त: = व्यवहारे ग्रहणार्ह इति । अत अत्र कालस्य त्रैविध्यं सिद्धम् । यथाहिभूतानामन्तकृदेक:, व्यावहारिक:, स्थूलो द्वितीय: व्यवहारानर्ह: सूक्ष्मस्तृतीय इति । यथा उक्तं सूर्यसिद्धान्तमध्यमाधिकारेदशमश्लोके यथा–

लोकानामन्तकृत्काल: कालोऽन्य: कलनात्मक: ।
स द्विधा स्थूलसूक्ष्मत्वान्मूर्तश्चामूर्त उच्यते ॥[२]

प्राणो हि सुखासीनस्वस्थपुरुषस्यैकश्वासोच्छ्वासान्तर्वर्तीकाल: (असु:) प्राण अर्थात् सुखासीनस्वस्थपुरुषस्य एकश्वासोच्छ्वासान्तवर्तिकाल असु: प्राणसंज्ञक: काल: कथ्यते । अव्याहतदशगुर्वक्षरोच्चारणकालसम: । यथा भाष्कराचार्यै उक्तं गुर्वक्षरै: खेन्दुमितैरसु इति

। एवम् असु पल दण्डादिको कालः समानार्थकः । प्राणानान्तरायमाणः कालः मूर्तः = व्यवहारार्हः स्थूलत्वात् कथितः ।

अथामूर्तमाह–

अतः परम् अमूर्तकालः व्याख्यायते यथा – त्रुट्याद्य – त्रुटिर्हिनेत्रपक्षद्वयसंयोगकालस्य, सहस्‍यतमभागतुल्या भवति । यथा उक्तवान् भास्कराचार्यैः, योक्ष्णोर्निमेषस्य खरामभागः सतत्परस्तच्छतभागउक्ता इति त्रुटिः । अर्थात् नेत्रद्वय संयोगकालस्य सहस्त्रयतमभागतुल्या त्रुटिः । नारदाचार्यै उक्तं यथा–

**सूच्याभिन्ने पद्मपत्रे त्रुटिरित्यभिधीयते ।[३] इति ।**

अर्थात् कमलपत्रस्य सूचीद्वाराभेदनेन यः कालः गमिष्यति सः कालः त्रुटिसंज्ञकः भवति । त्रुटि, तत्पर, निमेषप्रभृतिकः कालः प्राणान्तरायमाण अमूर्तसंज्ञकः = व्यवहारे ग्रहणार्ह अति सूक्ष्मत्वात् इति । व्यवहारे स्थूलकालस्य उपयोगितावशात् तत्परिभाषा यथा – षड्भिरितियस्तुप्राणः (असुः) आख्यातस्तैः षड्भिः(६) प्राणै एका विनाडी भवति, विनाडी विघटिका=पलमितिसमानार्थकाः पर्यायवाचिशब्दः, तत्षष्ठ्याविनाडीनां षष्ठ्या नाडिका = एकनाडी = एकाघटिका = एकदण्ड इति पर्यायवाचीशब्दाः । नाडी षष्ट्या अर्थात् घटिकानां षष्ट्या नाक्षत्रं नक्षत्र – जनितम् अहोरात्रं भवति । अहश्च रात्रिश्चेत्यहोरात्रम् इति । अत्र तु शब्दात् घटिकानामपिनक्षत्रत्वमहोरात्रस्य नाक्षत्रत्वात् । इदमुक्तं भवति । एकस्य कस्यचित् नक्षत्रस्योदयानन्तरं तस्य पुनरुदयं यावत् यावान् कालस्तन्नाक्षत्रमहोरात्रं तत् षष्टिघटीतुल्यमिति । तत्त्रिंशता = नाक्षत्रहोरात्राणां त्रिंशतो(३०) मासः = एको नाक्षत्रमासो भवेत् । अतः परं सावनदिनं व्याख्यायते । सावनोऽर्कोदयैस्तथेति यथा नक्षत्रोदयद्वयान्तर्गतं नाक्षत्रदिनं, तत्त्रिंशता

नाक्षत्रमास:, तथैवार्कोदयै: = सूर्योदयै: सावनो ज्ञातव्य: । अर्थात् सूर्योदयद्वयान्तर्गत: काल: सावनमेकं दिनं भवति । त्रिंशत्सावनदिनैरेक: सावनोमासश्चेति ज्ञातव्य: । ग्रन्थप्रमाणं यथा सूर्यसिद्धान्तस्य मध्यमाधिकारे एकादशद्वादशतमे श्लोके, उक्तं

यथा –

प्राणादि: कथितोमूर्तस्त्रुट्याद्योऽमूर्तसंज्ञक: ।

षड्भि: प्राणैर्विनाडीस्यात् तत्षष्ट्या नाडिका स्मृता ॥

नाडीषष्ट्यातु नाक्षत्रमहोरात्रं प्रकीर्तितम् ।

तत्त्रिंशता भवेन्मास: सावनोऽर्कोदयैस्तथा ॥[४]

अत: परं व्याख्यायते नवविधकालमानानि –

नवविधकालमानस्य नामानि यथा वर्तन्ते -

(१) ब्राह्मं
(२) दिव्यं
(३) पित्र्यं
(४) प्रजापत्यम्
(५) गुरु:
(६) सौरं
(७) सावनं
(८) चान्द्रं
(९) नाक्षत्रमानम्

एवं नवविधकालमानानि भवन्ति । सिद्धान्ततत्वविवेके मध्यमाधिकारे ग्रन्थप्रमाणं यथा –

ब्राह्मं दिव्यं तथा पैत्र्यं प्राजापत्यं गुरोस्तथा ।

सौरं च सावनं चान्द्रमार्क्षं मानानि वै नव ॥[५]

अत: परं व्याख्यायते ब्राह्ममानम् –

सहस्त्रसंख्यकमहायुगैः भूतसंहारकः, सकलचराचर- जीवानां प्रलयकृतकल्पः भवति । स एव कल्पः ब्राह्मसम्बन्धि अहः = दिनमेकम् आर्यैः कथितम् । तथा तस्य ब्राह्मणं तावती = तावत्प्रमाणा (सहस्रमहायुगात्मिका) रात्रिः भवति । अर्थात् ब्राह्मणे अहोरात्रमेकं कल्पद्वयमुक्तमार्यैः । गीतायां भगवान् श्रीकृष्णः कथयति -

सहस्त्रयुगपर्यन्तमहर्यद् ब्रह्मणो विदुः ।

रात्रियुगसहसर तां तेऽहोरात्रविदो जनाः ॥[६]

दिनकल्पे भूतानामाविर्भावः तथा दिनकल्पावसाने (रात्रिकल्पारम्भे) भूतानां तिरोभावः संहारः भवति । गीतायां भगवता श्रीकृष्णेन उक्तं द्वितीयप्रमाणं यथा -

अव्यक्ताद् व्यक्तयः सर्वाः प्रभवन्त्यहरागमे ।

रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके ॥[७]

अर्थात् एकसहस्त्रयुगानाम् एकः कल्पः भवति । तथा एककल्पस्य एकब्राह्मदिनं भवति । कल्पद्वयस्य ब्राह्मणस्य एकम् अहोरात्रं भवति । सूर्यसिद्धान्ते मध्यमाधिकारे विंशतितमेश्लोके उक्तं यथा -

इत्थं युगसहस्त्रेण भूतसंहारकारकः ।

कल्पो ब्राह्ममहः प्रोक्तं शर्वरी तस्य तावती ॥[८]

(२)दिव्यमानम् -

द्वादशसौरमासाः = एकसौरववर्षम् = एकदिव्य, अहोरात्रं भवति । अर्थात् एकस्मिन् सौरवर्षे = एकदिव्य अहोरात्रं भवति । यथा उक्तं सूर्यसिद्धान्तमध्यामाधिकारस्य त्रयोदशतमे श्लोके प्रमाणं यथा -

ऐन्दवस्तिथिभिस्तद्वत् संक्रान्त्या सौर उच्यते ।

मासैर्द्वादशभिर्वर्षं दिव्यं तदह उच्यते ॥[९]

(३) पितृमानम् –

यदा एकचान्द्रमासः व्यतीतं भवति तदा एकं पितृमानं = एकं पितृदिनं भवति । तथा मासान्ते दिनार्धम् एवं पक्षान्ते रात्र्यर्धं भवति । प्रमाणं यथा –

त्रिंशता तिथिभिर्मासश्चान्द्रः पित्र्यमहः स्मृतम् ।[१०]

(४) प्राजापत्यमानम् –

एकसप्ततिमहायुगै एकं मन्वन्तरं भवति । तथा एकमन्वन्तरस्य व्यतीते यः समयः लगति सः प्रजापतिमानं भवति । सूर्यसिद्धान्तमध्यमाधिकारे अष्टादशतमे श्लोके लिखितं यथा –

युगानां सप्ततिः सैकामन्वन्तरमिहोच्यते ।
कृताब्दसंख्या तस्यान्ते सन्धिः प्रोक्तो जलप्लवः ॥[११]

(५) गुरुमानम् –

गुरोः मध्यमगत्या एकराशिभोगकालैकं गुरुमानं (संवत्सरं) भवति । सूर्यसिद्धान्तमध्यमाधिकारे पञ्चाशत् श्लोकस्य टीकायां यथा उक्तं तथैव बृहत्संहिताग्रन्थे च उक्तं यथा –

बृहस्पतेर्मध्यमराशिभोगात् संवत्सरं सांहितिका वदन्ति ॥[१२]

अस्मिन् विषये वशिष्ठो यथा –

"मध्यगत्या भभोगेन गुरोर्गौरववत्सराः ॥[१३] इति ।

(६) सौरमानम् –

संक्रान्तिशब्दात् सूर्यसंक्रान्तेरेवग्रहणं भवति। सूर्य -- केन्द्रविन्दोः प्रथमराशिप्रवेशकालादन्यराशिप्रवेशकालं यावदेकः सौरमासः । तथा तस्य त्रिंशत्तमोभागः रवेरेकांशभोगकालः सौरदिनम् । प्रमाणं यथा सूर्यसिद्धान्तमध्यमाधिकारस्य त्रयोदशश्लोके यथा –

संक्रान्त्या सौर उच्यते ।[१४] इति ।

(७)सावनमानम् –

सूर्यस्य एकस्मादुदयादव्यवहितान्योदयं यावत् उदयद्वयान्तर्गतः कालः भूमिसावनवासरः भूमिसावनदिनं भवति । यथा भाष्कराचार्यै उक्तम् –

इनोदयद्वयान्तरं तदर्कसावनं दिनं ।
तदेवमेदिनी दिनं भवासुरस्तु भभ्रमः ॥[१५] इति ॥

*तथैव उक्तं सूर्यसिद्धान्ते यथा –*

प्रवहवायुद्वाराप्रथमसूर्योदयात् द्वितीय–दिवससूर्यो उदयपर्यन्त-कालः सावनमानं कथ्यते। अर्थात् ग्रहोदयात् ग्रहसावनदिनं, नक्षत्रोदयात् नक्षत्रसावनमानम् एवं प्रत्येकग्रहनक्षत्राणां भिन्नं–भिन्नं सावनमानं पठिताः वर्तन्ते । यस्मिन् लोकव्यवहारे सूर्यसावनमानस्य उपयोगिता भवति । अर्थात् सूर्योदयात् अग्रिं सूर्योदयपर्यन्तकालः सूर्यसावनमानं कथ्यते । यथा सूर्यसिद्धान्ते मध्यमाधिकारस्य षड्त्रिंशत् श्लोके उक्तम् उदयादुदयं भानोर्भूमिसावनवासराः।[१६] इति।

(८)चान्द्रमानम् – दर्शे सूर्येन्दुसङ्गमः भवति अर्थात् अमायां सूर्यचन्द्रयोः केन्द्राणां सम्मेलनं भवति। योगानन्तरं सूर्यात् चन्द्रः यावदन्तरितं भवति सः, अंशात्मककालः चान्द्रमानं भवति कथ्यते च । इयं चान्द्रमानं